# WEST BENGAL STATE UNIVERSITY

B.A./B.Com. Programme 3rd Semester Examination, 2021-22

## SANLCOR01T-SANSKRIT (MIL)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क–विभागः

1. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) हितोपदेशः किमर्थं विरचितः ?

(ख) सुदर्शनः कस्य प्रदेशस्य राजा आसीत् ?

(ग) कपोतराजस्य नाम किम् ? सः किं कृतवान् ?

(घ) लघुपतनको नाम वायसः कुत्र वसति स्म ? सः किं दृष्टवान् ?

(ङ) केवलं शास्त्रविद्याभ्यस्तस्य जनस्य वृद्धत्वे का दशा भवति ?

(च) "प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा"– अस्य वचनस्य तात्पर्यं लिख्यताम्।

(छ) राज्ञः कृते जीवलोकस्य षट् सुखानि कानि ?

2. अधोलिखितयोः एकः प्रश्नः समाधेयः। 10×1 = 10

(क) मित्रलाभस्य वृद्धव्याघ्र-लुब्धविप्रकथामवलम्ब्य खलस्य चरित्रं कीदृशं भवति, लोभस्य च कीदृशो दुष्परिणामो भवतीति संक्षेपेण लिखत।

(ख) मित्रलाभस्य मृगशृगालकथां समासेन वर्णयत।

### ख–विभागः

3. अधोलिखितेषु यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) नीतिशतके भर्तृहरिणा कृतं मूर्खनिन्दनं वैशद्येन वर्णनीयम्।

(ख) नीतिशतकमाश्रित्य विद्यामाहात्म्यं प्रतिपादनीयम्।

4. अधोलिखितेषु चतुर्णां श्लोकानां व्याख्या लेख्या। तासु व्याख्यासु यथेच्छमेका संस्कृतभाषया देवनागरलिप्या च कार्या। 5×4 = 20

(क) प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रांऽकुरात्
समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलम्।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारयेत्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥

(ख) वरं पर्वतदुर्गेषु भ्रान्तं वनचरैस्सह।
न मूर्खजनसम्पर्कः सुरेन्द्रभुवनेष्वपि॥

(ग) अम्भोजिनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता।
नत्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्त्तिमपहर्तुमसौ समर्थः॥

(घ) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरुणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूजिता न हि धनं विद्याविहीनः पशुः॥

(ङ) यदा किञ्चिज्ज्ञोऽहं द्विष इव मदांधः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——